# devarShikRitaM gajAnanastotram

# ગજાનનસ્તોત્રં દેવર્ષિકૃતમ્

## Document Information

Text title : devarShikRitaMgajAnanastotram

File name : devarShikRitaMgajAnanastotram.itx

Category : ganesha, stotra

Location : doc_ganesha

Author : Traditional

Proofread by : Karthik Chandan.P : Amith K Nagaraj

Description-comments : mudgalapurANaM chaturthaH khaNDaH | adhyAyaH 43 | 443. 340||

Latest update : March 9, 2004

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 1, 2024

*sanskritdocuments.org*

# ગજાનનસ્તોત્રં દેવર્ષિકૃતમ્

શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ -
શાન્તિ-રૂપ-ધરં લોભં દૃષ્ટ્વા દેવર્ષયોઽમલાઃ ।
ગજાનનં નિજં નાથં હર્ષિતા નેમુરાદરાત્ ॥

ગજાનનં પૂજયિત્વા વિધાનેન સુરર્ષયઃ ।
પુનઃ પ્રણમ્ય તં સર્વે તુષ્ટુવુઃ કરસમ્પુટૈઃ ॥

(સુરર્ષય ઊચુઃ -)
દેવર્ષય ઊચુઃ । (મુદ્ગલ ઉવાચ ।)
વિદેહરૂપં ભવબન્ધહારં સદા સ્વનિષ્ઠં સ્વસુખપ્રદમ્ તમ્ ।
અમેયસાંખ્યેન ચ લક્ષ્મીશં ગજાનનં ભક્તિયુતં ભજામઃ ॥ ૧॥

મુનીન્દ્રવન્દ્યં વિધિબોધહીનં સુબુદ્ધિદં બુદ્ધિધરં પ્રશાન્તમ્ ।
વિકારહીનં સકલાંમકં વૈ ગજાનનં ભક્તિયુતં ભજામઃ ॥ ૨॥

અમેય રૂપં હૃદિ સંસ્થિતં તં બ્રહ્માઽહમેકં ભ્રમનાશકારમ્ ।
અનાદિ-મધ્યાન્તમપારરૂપં ગજાનનં ભક્તિયુતં ભજામઃ ॥ ૩॥

જગત્પ્રમાણં જગદીશમેવમગમ્યમાદ્યં જગદાદિહીનમ્ ।
અનાત્મનાં મોહપ્રદં પુરાણં ગજાનનં ભક્તિયુતં ભજામઃ ॥ ૪॥

ન પૃથ્વિરૂપં ન જલપ્રકાશનં ન તેજસંસ્થં ન સમીરસંસ્થમ્ ।
ન ખે ગતં પંચવિભૂતિહીનં ગજાનનં ભક્તિયુતં ભજામઃ ॥ ૫॥

ન વિશ્વગં તૈજસગં ન પ્રાજ્ઞં સમષ્ટિ-વ્યષ્ટિસ્થ-મનન્તગં તમ્ ।
ગુણૈર્વિહીનં પરમાર્થભૂતં ગજાનનં ભક્તિયુતં ભજામઃ ॥ ૬॥

ગણેશગં નૈવ ચ બિન્દુસંસ્થં ન દેહિનં બોધમયં ન ઢુણ્ઢી ।
સુયોગહીનં પ્રવદન્તિ તત્સ્થં ગજાનનં ભક્તિયુતં ભજામઃ ॥ ૭॥

અનાગતં ગ્રૈવગતં ગણેશં કથં તદાકારમયં વદામઃ ।
તથાપિ સર્વં પ્રતિદેહસંસ્થં ગજાનનં ભક્તિયુતં ભજામઃ ॥ ૮॥

યદિ ત્વયા નાથ! ધૃતં ન કિંચિત્તદા કથં સર્વમિદં ભજામિ ।
અતો મહાત્માનમચિન્ત્યમેવં ગજાનન ભક્તિયુતં ભજામઃ ॥ ૯॥

સુસિદ્ધિદં ભક્તજનસ્ય દેવં સકામિકાનામિહ સૌખ્યદં તમ્ ।
અકામિકાનાં ભવબન્ધહારં ગજાનનં ભક્તિયુતં ભજામઃ ॥ ૧૦॥

સુરેન્દ્રસેવ્યં હ્યસુરૈઃ સુસેવ્યં સમાનભાવેન વિરાજયન્તમ્ ।
અનન્તબાહુ મૂષકધ્વજં તં ગજાનનં ભક્તિયુતં ભજામઃ ॥ ૧૧॥

સદા સુખાનન્દમયં જલે ચ સમુદ્રજે ઇક્ષુરસે નિવાસમ્ ।
દ્વન્દ્વસ્ય યાનેન ચ નાશરૂપે ગજાનનં ભક્તિયુતં ભજામઃ ॥ ૧૨॥

ચતુઃપદાર્થા વિવિધપ્રકાશસ્તદેવ હસ્તં સુચતુર્ભુજં તમ્ ।
અનાથનાથં ચ મહોદરં વૈ ગજાનનં ભક્તિયુતં ભજામઃ ॥ ૧૩॥

મહાખુમારૂઢમકાલકાલં વિદેહયોગેન ચ લભ્યમાનમ્ ।
અમાયિનં માયિકમોહદં તં ગજાનનં ભક્તિયુતં ભજામઃ ॥ ૧૪॥

રવિસ્વરૂપં રવિભાસહીનં હરિસ્વરૂપં હરિબોધહીનમ્ ।
શિવસ્વરૂપં શિવભાસનાશં ગજાનનં ભક્તિયુતં ભજામઃ ॥ ૧૫॥

મહેશ્વરીસ્થં ચ સુશક્તિહીનં પ્રભું પરેશં પરવન્દ્યમેવમ્ ।
અચાલકં ચાલકબીજરૂપં ગજાનનં ભક્તિયુતં ભજામઃ ॥ ૧૬॥

શિવાદિ-દેવૈશ્ચ ખગૈશ્ચ વન્દ્યં નરૈર્લતા-વૃક્ષ-પશુપ્રમુખ્યૈઃ ।
ચરાઽચરૈર્લોક-વિહીનમેવં ગજાનનં ભક્તિયુતં ભજામઃ ॥ ૧૭॥

મનોવચોહીનતયા સુસંસ્થં નિવૃત્તિમાત્રં હ્યજમવ્યયં તમ્ ।
તથાઽપિ દેવં પુરસંસ્થિતં તં ગજાનનં ભક્તિયુતં ભજામઃ ॥ ૧૮॥

વયં સુધન્યા ગણપસ્તવેન તથૈવ મર્ત્યાર્ચનતસ્તથૈવ ।
ગણેશરૂપાશ્ચ કૃતાસ્ત્વયા તં ગજાનનં ભક્તિયુતં ભજામઃ ॥ ૧૯॥

ગજાખ્યબીજં પ્રવદન્તિ વેદાસ્તદેવ ચિહ્નેન ચ યોગિનસ્ત્વામ્ ।
ગચ્છન્તિ તેનૈવ ગજાનનં તં ગજાનનં ભક્તિયુતં ભજામઃ ॥ ૨૦॥

પુરાણવેદાઃ શિવવિષ્ણુકાદ્યામરાઃ શુકાદ્યા ગણપસ્તવે વૈ ।
વિકુણ્ઠિતાઃ કિં ચ વયં સ્તવામો ગજાનનં ભક્તિયુતં ભજામઃ ॥ ૨૧॥

મુદ્ગલ ઉવાચ ॥

એવં સ્તુત્વા ગણેશાનં નેમુઃ સર્વે પુનઃ પુનઃ ।
તાનુત્થાપ્ય વચો રમ્યં ગજાનન ઉવાચ હ ॥ ૨૨॥

ગજાનન ઉવાચ ॥

વરં બ્રૂત મહાભાગા દેવાઃ સર્ષિગણાઃ પરમ્ ।
સ્તોત્રેણ પ્રીતિસંયુક્તો દાસ્યામિ વાંછિતં પરમ્ ॥ ૨૩॥

ગજાનનવચઃ શ્રુત્વા હર્ષયુક્તા સુરર્ષયઃ ।
જગુસ્તં ભક્તિભાવેન સાશ્રુનેત્રા પ્રજાપતે ॥ ૨૪॥

દેવર્ષય ઊચુઃ ॥

યદિ ગજાનન સ્વામિન્ પ્રસન્નો વરદોઽસિ મે ।
તદા ભક્તિં દૃઢાં દેહિ લોભહીનાં ત્વદીયકામ્ ॥ ૨૫॥

લોભાસુરસ્ય દેવેશ કૃતા શાન્તિઃ સુખપ્રદા ।
તયા ગજદિદં સર્વં વરયુક્તં કૃતં ત્વયા ॥ ૨૬॥

અધુના દેવદેવેશ! કર્મયુક્તા દ્વિજાતયઃ ।
ભવિષ્યન્તિ ધરાયાં વૈ વયં સ્વસ્થાનગાસ્તથા ॥ ૨૭॥

સ્વ-સ્વધર્મરતાઃ સર્વે કૃતાસ્ત્વયા ગજાનન!।
અતઃ પરં વરં ઢુણ્ઢે યાચમાનઃ કિમપ્યહો!॥ ૨૮॥

યદા તે સ્મરણં નાથ કરિષ્યામો વયં પ્રભો ।
તદા સંકટહીનાન્ વૈ કુરૂ ત્વં નો ગજાનન!॥ ૨૯॥

એવમુક્ત્વા પ્રણેમુસ્તં ગજાનનમનામયમ્ ।
તાનુવાચ સપ્રીત્યાત્મા ભક્તાધીનઃ સ્વભાવતઃ ॥ ૩૦॥

ગજાનન ઉવાચ ॥

યદ્યચ્ચ પ્રાર્થિતં દેવા મુનયઃ સર્વમંજસા ।
ભવિષ્યતિ ન સન્દેહો મત્સ્મૃત્યા સર્વદા હિ વઃ ॥ ૩૧॥

ભવત્કૃતમદીયં વૈ સ્તોત્રં સર્વત્ર સિદ્ધિદમ્ ।
ભવિષ્યતિ વિશેષેણ મમ ભક્તિ-પ્રદાયકમ્ ॥ ૩૨॥

પુત્ર-પૌત્ર-પ્રદં પૂર્ણં ધન-ધાન્ય-પ્રવર્ધનમ્ ।
સર્વસમ્પત્કરં દેવાઃ પઠનાચ્છ્રવણાન્નૃણામ્ ॥ ૩૩॥

મારણોચ્ચાટનાદીનિ નશ્યન્તિ સ્તોત્રપાઠતઃ ।
પરકૃત્યં ચ વિપ્રેન્દ્રા અશુભં નૈવ બાધતે ॥ ૩૪॥

સંગ્રામે જયદં ચૈવ યાત્રાકાલે ફલપ્રદમ્ ।
શત્રૂચ્ચાટનાદિષુ ચ પ્રશસ્તં તદ્ ભવિષ્યતિ ॥ ૩૫॥

કારાગૃહગતસ્યૈવ બન્ધનાશકરં ભવેત્ ।
અસાધ્યં સાધયેત્ સર્વમનેનૈવ સુરર્ષયઃ ॥ ૩૬॥

એકવિંશતિ વારં તત્ ચૈકવિંશદ્દિનાવધિમ્ ।
પ્રયોગં યઃ કરોત્યેવ સર્વસિદ્ધિયુતો ભવેત્ ॥ ૩૭॥

ધર્માઽર્થકામ-મોક્ષાણાં બ્રહ્મભૂતસ્ય દાયકમ્ ।
ભવિષ્યતિ ન સન્દેહઃ સ્તોત્રં મદ્ભક્તિવર્ધનમ્ ॥ ૩૮॥

એવમુક્ત્વા ગણાધીશસ્તત્રૈવાન્તરધીયત ॥

ઇતિ મુદ્ગલપુરાણાન્તર્ગતં ગજાનનસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ મુદ્ગલપુરાણં ચતુર્થઃ ખણ્ડઃ । અધ્યાયઃ ૪૩ । ૪.૪૩। ૩-૪૦॥

- .. mudgalapurANaM chaturthaH khaNDaH . adhyAyaH 43 . 4.43. 3-40..

Proofread by Karthik Chandan.P, Amith K Nagaraj

*devarShikRitaM gajAnanastotram*

pdf was typeset on June 1, 2024

Please send corrections to *sanskrit@cheerful.com*